Mahalakshmi Kavach,

# महालक्ष्मी कवच

नारायण उवाच

सर्व सम्पत्प्रदस्यास्य कवचस्य प्रजापतिः।

ऋषिश्छन्दश्च बृहती देवी पद्मालया स्वयम्॥१॥

धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः।

पुण्यबीजं च महतां कवचं परमाद्भुतम्॥२॥

ॐ ह्रीं कमलवासिन्यै स्वाहा मे पातु मस्तकम्।

श्रीं मे पातु कपालं च लोचने श्रीं श्रियै नमः॥३॥

ॐ श्रीं श्रियै स्वाहेति च कर्णयुग्मं सदावतु।

ॐ श्रीं ह्रीं क्लीं महालक्ष्म्यै स्वाहा मे पातु नासिकाम्॥४॥

ॐ श्रीं पद्मालयायै च स्वाहा दन्तं सदावतु।

ॐ श्रीं कृष्णप्रियायै च दन्तरन्ध्रं सदावतु॥५॥

www.totalbhakti.com

ॐ श्रीं नारायणेशायै मम कण्ठं सदावतु।

ॐ श्रीं केशवकान्तायै मम स्कन्धं सदावतु॥६॥

ॐ श्रीं पद्मनिवासिन्यै स्वाहा नाभिं सदावतु।

ॐ ह्रीं श्रीं संसारमात्रे मम वक्षः सदावतु॥७॥

ॐ श्रीं श्रीं कृष्णकान्तायै स्वाहा पृष्ठं सदावतु।

ॐ ह्रीं श्रीं श्रियै स्वाहा मम हस्तौ सदावतु॥८॥

ॐ श्रीं निवासकान्तायै मम पादौ सदावतु।

ॐ ह्रीं श्रीं क्लीं श्रियै स्वाहा सर्वांगं मे सदावतु॥९॥

प्राच्यां पातु महालक्ष्मीराग्नेय्यां कमलालया।

पद्मा मां दक्षिणे पातु नैर्ऋत्यां श्रीहरिप्रिया॥१०॥

पद्मालया पश्चिमे मां वायव्यां पातु श्रीः स्वयम्।

उत्तरे कमला पातु ऐशान्यां सिन्धुकन्यका॥११॥

नारायणेशी पातूर्ध्वमधो विष्णुप्रियावतु।

संततं सर्वतः पातु विष्णुप्राणाधिका मम॥१२॥

www.totalbhakti.com

इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।

सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतम्॥१३॥

सुवर्णपर्वतं दत्वा मेरुतुल्यं द्विजातये।

यत् फलं लभते धर्मी कवचेन ततोऽधिकम्॥१४॥

गुरुमभ्यर्च्य विधिवत् कवचं धारयेत् तु यः।

कण्ठे वा दक्षिणे वाहौ स श्रीमान् प्रतिजन्मनि॥१५॥

अस्ति लक्ष्मीर्गृहे तस्य निश्चला शतपूरुषम्।

देवेन्द्रैश्चासुरेन्द्रैश्च सोऽत्रध्यो निश्चितं भवेत्॥१६॥

स सर्वपुण्यवान् धीमान् सर्वयज्ञेषु दीक्षितः।

स स्नातः सर्वतीर्थेषु यस्येदं कवचं गले॥१७॥

यस्मै कस्मै न दातव्यं लोभमोहभयैरपि।

गुरुभक्ताय शिष्याय शरणाय प्रकाशयेत्॥१८॥

इदं कवचमज्ञात्वा जपेल्लक्ष्मीं जगत्प्रसूम्।

कोटिसंख्यं प्रजप्तोऽपि न मन्त्रः सोद्धिदायकः॥१९॥

www.totalbhakti.com